तारास्तोत्रम्

{॥ तारास्तोत्रम् ॥}

श्रीगणेशाय नमः ।

मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे

प्रत्यालीढपदस्थिते शवहृदि स्मेराननाम्भोरुहे ।

फुल्लेन्दीवरलोचने त्रिनयने कर्त्रीकपालोत्पले खड्गं

चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये ॥ १॥

वाचामीश्वरि भक्तिकल्पलतिके सर्वार्थसिद्धिश्वरि

गद्यप्राकृतपद्यजातरचनासर्वार्थसिद्धिप्रदे ।

नीलेन्दीवरलोचनत्रययुते कारुण्यवारान्निधे

सौभाग्यामृतवर्धनेन कृपयासिञ्च त्वमस्मादृशम् ॥ २॥

खर्वे गर्वसमूहपूरिततनो सर्पादिवेषोज्वले

व्याघ्रत्वक्परिवीतसुन्दरकटिव्याधूतघण्टाङ्किते ।

सद्यःकृत्तगलद्रजःपरिमिलन्मुण्डद्वयीमूर्द्धज-

ग्रन्थिश्रेणिनृमुण्डदामललिते भीमे भयं नाशय ॥ ३॥

मायानङ्गविकाररूपललनाबिन्द्वर्द्धचन्द्राम्बिके

हुंफट्कारमयि त्वमेव शरणं मन्त्रात्मिके मादृशः ।

मूर्तिस्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मा

Stotram Digitalized By Sanskritdocuments.org

परा वेदानां नहि गोचरा कथमपि प्राज्ञैर्नुतामाश्रये ॥ ४॥

त्वत्पादाम्बुजसेवया सुकृतिनो गच्छन्ति सायुज्यतां

तस्याः श्रीपरमेश्वरत्रिनयनब्रह्मादिसाम्यात्मनः ।

संसाराम्बुधिमज्जने पटुतनुर्देवेन्द्रमुख्यासुरान्

मातस्ते पदसेवने हि विमुखान् किं मन्दधीः सेवते ॥ ५॥

मातस्त्वत्पदपङ्कजद्वयरजोमुद्राङ्ककोटीरिणस्ते

देवा जयसङ्गरे विजयिनो निःशङ्कमङ्के गताः ।

देवोऽहं भुवने न मे सम इति स्पर्द्धां वहन्तः परे

तत्तुल्यां नियतं यथा शशिरवी नाशं व्रजन्ति स्वयम् ॥ ६॥

त्वन्नामस्मरणात्पलायनपरान्द्रष्टुं च शक्ता न ते

भूतप्रेतपिशाचराक्षसगणा यक्षश्च नागाधिपाः ।

दैत्या दानवपुङ्गवाश्च खचरा व्याघ्रादिका जन्तवो

डाकिन्यः कुपितान्तकश्च मनुजान् मातः क्षणं भूतले ॥ ७॥

लक्ष्मीः सिद्धिगणश्च पादुकमुखाः सिद्धास्तथा वैरिणां

स्तम्भश्चापि वराङ्गने गजघटास्तम्भस्तथा मोहनम् ।

मातस्त्वत्पदसेवया खलु नृणां सिद्ध्यन्ति ते ते गुणाः

क्लान्तः कान्तमनोभवोऽत्र भवति क्षुद्रोऽपि वाचस्पतिः ॥ ८॥

ताराष्टकमिदं पुण्यं भक्तिमान् यः पठेन्नरः ।

प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः ॥ ९॥

लभते कवितां विद्यां सर्वशास्त्रार्थविद्भवेत्

लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान्यथेप्सितान् ।

कीर्तिं कान्तिं च नैरुज्यं प्राप्यान्ते मोक्षमाप्नुयात् ॥ १०॥

॥ इति श्रीनीलतन्त्रे तारास्तोत्रं सम्पूर्णम् ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Tara Stotram Lyrics in Devanagari PDF
% File name : tArAstotram.itx
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com)
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : niilatantre
% Latest update : February 28, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of

% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website